# Shri Sharada Shatashlokistavah

# શ્રીશારદાશતશ્લોકીસ્તવઃ

## Document Information

Text title : shAradAshatashlokIstavaH

File name : shAradAshatashlokIstavaH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI, shataka, stava

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશારદાશતશ્લોકીસ્તવઃ

કરોતુ પદવિન્યાસાન્કમલાસનકામિની ।
જિહ્વાગ્રે મમ કારુણ્યાજ્જિતચન્દ્રાયુતપ્રભા ॥ ૧॥

પાપેઽપિ શારદામ્બ ત્વં કૃત્વા બહુકૃપાં મયિ ।
ગરીયસીં ચાપિ વાઞ્છાં પૂરયાશુ કૃપાનિધે ॥ ૨॥

બહુભિસ્ત્વદ્વદનામ્બુજમુલ્લેખૈઃ સ્તોતુમાર્યજનહૃદ્યૈઃ ।
પ્રતિભાં પ્રયચ્છ મહ્યં કરુણાજલધે પયોજભવજાયે ॥ ૩॥

ચમ્પકસુમકોરકયુક્ચકિતમૃગીપ્રેક્ષણેન સંયુક્તમ્ ।
શુકકેકિનિનદજુષ્ટં વનમિવ તવ ભાતિ વદનાબ્જમ્ ॥ ૪॥

નાસિકાખ્યવરશાખયા યુતં ખઞ્જરીટખગયુગ્મભૂષિતમ્ ।
પક્વબિમ્બફલસંયુતં શિવે ભાતિ ભૂરુહ ઇવાનનં તવ ॥ ૫॥

ભક્તકેકિકુલતોષણવ્રતં પદ્મસમ્ભવહૃદમ્બરાશ્રિતમ્ ।
ગદ્યપદ્યમયવારિસન્દદન્મેઘવત્તવ મુખં વિભાતિ મે ॥ ૬॥

નેત્રોત્પલાલઙ્કૃતમધ્યભાગં ભ્રૂવલ્લિકાબમ્ભરપઙ્ક્તિરમ્યમ્ ।
પક્ષ્માલિશૈવાલયુતં વિભાતિ તવાસ્યમેતત્સરસીવ વાણિ ॥ ૭॥

સુચિલ્લિકાતોરણશોભમાનં વિશાલફાલાઙ્ગણરમ્યરમ્યમ્ ।
ઉત્તુઙ્ગમાણિક્યકિરીટહર્મ્યં વિભાતિ વેશ્મેવ તવામ્બ વક્ત્રમ્ ॥ ૮॥

નયનઝષયુતોઽયં દન્તમુક્તાફલાઢ્યો
    દશનવસનનામશ્રીપ્રવાલપ્રભાયુક્ ।
પ્રતિપદમભિવૃદ્ધૈઃ કાન્તિપૂરૈઃ સમેતઃ
    શરધિરિવ વિભાતિ ત્વન્મુખં વાક્સવિત્રિ ॥ ૯॥

કલય કલિવિમોકં કાલકાલાનુજાતે
    કલય શુભસમૃદ્ધિં ભૂમિમધ્યેઽખિલેઽસ્મિન્ ।

કલય રુચિસમૃદ્ધિં સ્વસ્વધર્મે જનાનાં
    કલય સુખસમૃદ્ધિં સ્વસ્વધર્મે રતાનામ્ ॥ ૧૦॥

સ્ફુર હૃદયસરોજે શારદે શુભ્રવર્ણે
    કલશમમૃતપૂર્ણં માલિકાં બોધમુદ્રામ્ ।
સરસિજનિભહસ્તૈર્બિભ્રતી પુસ્તકં ચ
    પ્રણતહૃદયમચ્છં કુર્વતી તૂર્ણમેવ ॥ ૧૧॥

પાલય માં કરુણાબ્ધે પરિવારયુતં ત્વિહાપિ શૃઙ્ગાદ્રૌ ।
શારદશશિનિભવદને વરદે લઘુ શારદે સદયે ॥ ૧૨॥

ઐન્દ્રીમાશામૈન્દવીં વા કલામિ-
    ત્યાદૌ બીજં જાતુ માતસ્ત્વદીયમ્ ।
વ્યાજાદ્વા યો વ્યાહરેત્તસ્ય વક્ત્રા-
    દ્દિવ્યા વાચો નિઃસરન્ત્યપ્રયત્નાત્ ॥ ૧૩॥

શારદે તવ પદામ્બુજયુગ્મં બોધપુષ્પરસપૂર્ણમજસ્રમ્ ।
મામકં હૃદયસંજ્ઞકમીશે નૈવ મુઞ્ચતુ સરઃ કરુણાબ્ધે ॥ ૧૪॥

કથિતાનિ મદીપ્સિતાનિ માતર્મુહુરગ્રે તવ શારદામ્બિકે ત્વમ્ ।
ન હિ પૂરયસે ચિરાયસે કિં મદઘૌઘાત્કિમુ શક્ત્યભાવતો વા ॥ ૧૫॥

અદ્યૈવ મત્પ્રાર્થિતમમ્બ દદ્યા યદિ ત્વપારાં કરુણાં વિધાય ।
વેલાવિહીનં સુખમાપ્નુયાં હિ નૈવાત્ર સન્દેહલવોઽપિ કશ્ચિત્ ॥ ૧૬॥

કમનીયકવિત્વદાં જવાદ્રમણીયામ્બુજતુલ્યપદ્યુતામ્ ।
શમનીયભયાપહારિણીં રમણીં પદ્મભવસ્ય ભાવયે ॥ ૧૭॥

કાઙ્ક્ષે કમલજકામિનિ કમનીયૈઃ પદ્યનિકુરુમ્બૈઃ ।
સ્તોતું વાચાં નિકરં સ્વાયત્તં કલય જગદમ્બ ॥ ૧૮॥

કામં મમ ફાલતલે લિખતુ લિપિં દુઃખદાં વિધિઃ સતતમ્ ।
નાહં બિભેમિ માતર્લુમ્પામિ ત્વત્પદાબ્જરજસા તામ્ ॥ ૧૯॥

કિં કલ્પવૃક્ષમુખ્યૈઃ કિં કરધૃતમેરુણા શિવેનાપિ ।
કિં કમલયા ચ હૃદિ ચેત્કિઙ્કુરસર્વેષ્ટદા વાણી ॥ ૨૦॥

તુઙ્ગાતટનિકટચરં ભૃઙ્ગાવલિગર્વહરણચણચિકુરમ્ ।
શ્રીશારદાભિધાનં ભાગ્યં મમ જયતિ શૃઙ્ગશૈલાગ્રે ॥ ૨૧॥

નિરણાયિ મયા સમસ્તશાસ્ત્રા-
    ણ્યપિ વીક્ષ્ય પ્રણતાર્તિહારિ લોકે ।
પ્રવિહાય તવાઙ્ઘ્રિપઙ્કજાતં
    ન પરં વસ્ત્વિતિ વાણિ નિશ્ચિતં તત્ ॥ ૨૨॥

પદ્માસનાસિ ખલુ ભારતિ વાગધીશે
    પદ્માસનપ્રિયતમે કરલગ્નપદ્મે ।
મત્કં મનોઽમ્બુજમહો સ્વયમેવ માતઃ
    શ્રીશારદામ્બ વિજહાસિ કિમત્ર વાચ્યમ્ ॥ ૨૩॥

આનીય દિવ્યકુસુમાનિ કિરન્તિ લોકા
    યે ત્વત્પદાબ્જયુગલં વચસાં સવિત્રિ ।
તાન્પ્રાપ્તરાજપદવીંસ્તરસા કિરન્તિ
    પૌરાઙ્ગનાઃ કુસુમલાજચયેન નૂનમ્ ॥ ૨૪॥

આજ્ઞાસીદ્ગૌરવી મે તવ ખલુ કરુણાવારિધિઃ શારદામ્બા
    સાષ્ટાઙ્ગં યોગમારાદુપદિશતિ ભવાનૌરસઃ સૂનુરસ્યાઃ ।
ઇત્યપ્યદ્યાપિ માતર્ન હિ ખલુ કરુણા જાયતે મય્યનાથે
    કિં વા કુર્યાં વદામ્બ પ્રણતભયહરે શારદે ચાપલોઽહમ્ ॥ ૨૫॥

નાહં નિગૃહ્ય કરણાનિ સરોજજાત-
    જાયે ત્વદીયપદપઙ્કજયોર્હિ સેવામ્ ।
શક્નોમિ કર્તુમલસાગ્રશિખામણિર્ય-
    ત્તસ્માન્નિસર્ગકરુણાં કુરુ મય્યનાથે ॥ ૨૬॥

વાણિ સરસ્વતિ ભારતિ વાગ્વાદિનિ વારિજાતજનિજાયે ।
કાશ્મીરપુરનિવાસિનિ કામિતફલવૃન્દદાયિનિ નમસ્તે ॥ ૨૭॥

શરણં ત્વચ્ચરણં મે નાન્યદ્વાગ્દેવિ નિશ્ચિતં ત્વેતત્ ।
તસ્માત્કુરુ કરુણાં મય્યનન્યશરણે દ્રુતં માતઃ ॥ ૨૮॥

શરદભ્રસદભ્રવસ્ત્રવીતા કરદૂરીકૃતપઙ્કજાભિમાના ।
ચરણામ્બુજલગ્નનાકિમૌલિર્વરદા સ્યાન્મમ શારદા દયાર્દ્રા ॥ ૨૯॥

સ્થાપય નરકેષુ સદાપ્યથ સુખકાષ્ઠાસુ દિવ્યલોકેષુ ।
ન હિ તત્ર મે વિચારઃ પરં તુ ચિત્તં તવાઙ્ઘ્રિગતમસ્તુ ॥ ૩૦॥

શૃઙ્ગાદ્રિવાસલોલે ભૃઙ્ગાહઙ્કારહારિકચભારે ।

તુઙ્ગાતીરવિહારે ગઙ્ગાધરસોદરિ પ્રસીદ મમ ॥ ૩૧॥

ઋષ્યશૃઙ્ગજનિભૂમિવિભૂષે કશ્યપાદિમુનિવન્દિતપાદે ।
પશ્યદઙ્ઘ્રિમુખપાલનલોલે વશ્યપઙ્કજભવેઽવ સદા મામ્ ॥ ૩૨॥

કમ્બુડમ્બરનિવર્તકકણ્ઠામમ્બુધિં નિરવધિં કરુણાયાઃ ।
અમ્બુદપ્રતિમકેશસમૂહામમ્બુજોદ્ભવસખીં કલયેઽહમ્ ॥ ૩૩॥

ભર્મગર્વહરસંહનનાભાં શર્મદાં પદસરોજનતેભ્યઃ ।
કર્મભક્તિમુખપદ્ધતિગમ્યાં કુર્મહે મનસિ પદ્મજજાયામ્ ॥ ૩૪॥

શમ્ભુસોદરિ શશાઙ્કનિભાસ્યે મન્દબુદ્ધિવિતતેરપિ શીઘ્રમ્ ।
વાક્પ્રદાયિનિ કૃપામૃતરાશે શૃઙ્ગશૈલવરવાસવિલોલે ॥ ૩૫॥

તુષ્ટિમેહિ વચસાં જનનિ ત્વં મત્કૃતેન વિધિનાઽવિધિના વા ।
ઐઞ્જપેન પરિપૂરય વાઞ્છાં મામકીં ચ મહતીમપિ શીઘ્રમ્ ॥ ૩૬॥

તવૌરસં સૂનુમહો ત્વદીયભક્તાગ્રગણ્યા મમ દેશિકેન્દ્રાઃ ।
પ્રાહુર્યતોઽતો મયિ શારદામ્બ પાપ્યગ્રગણ્યેઽપિ દયા વિધેયા ॥ ૩૭॥

તવૌરસં માં સુતમાહુરાર્યાસ્ત્વત્પાદભક્તાગ્રસરા યતોઽતઃ ।
સોઢ્વા મદીયાન્સકલાપરાધાન્પુરો ભવામ્બાશુ ગિરાં સવિત્રિ ॥ ૩૮॥

ભક્તેષ્ટપાથોનિધિપૂર્ણચન્દ્રઃ કવિત્વમાકન્દવસન્તકાલઃ ।
જાડ્યાન્ધકારવ્રજપદ્મબન્ધુરમ્બ પ્રણામસ્તવ પાદપદ્મે ॥ ૩૯॥

મુખામ્બુજં ભાતુ જગજ્જનન્યા હૃદમ્બુજે મે જિતચન્દ્રબિમ્બમ્ ।
રદામ્બરાધઃકૃતપક્વબિમ્બં મહાઘવિધ્વંસનચઞ્ચ્વજસ્રમ્ ॥ ૪૦॥

યાનેન હંસં વદનેન ચન્દ્રં શ્રોણીભરાચ્છૈલપતિં ચ કામમ્ ।
કાઞ્ચિદ્ધસન્તીં કલયે હૃદબ્જે ચન્દ્રાર્ધરાજદ્વરકેશપાશામ્ ॥ ૪૧॥

વિસ્મૃત્ય દેહાદિકમમ્બ સમ્યક્સમુચ્ચરંસ્તાવકમન્ત્રરાજમ્ ।
તુઙ્ગાનદીપુણ્યતટે કદાહં સુસૈકતે સ્વૈરગતિર્ભવામિ ॥ ૪૨॥

શ્રીશાદિસંસેવિતપાદપદ્મે શ્રીબોધદાનવ્રતબદ્ધદીક્ષે ।
શ્રીકણ્ઠસોદર્યમિતાનુકમ્પે શ્રીશારદામ્બાશુ કૃપાં કુરુષ્વ ॥ ૪૩॥

હૃદ્યાનિ પદ્યાનિ વિનિઃસરન્તિ ત્વદઙ્ઘ્રિસમ્પૂજકવક્ત્રપદ્માત્ ।
વિના પ્રયત્નં તરસા ન ચિત્રં ત્વમમ્બ યસ્માદ્વચસાં સવિત્રી ॥ ૪૪॥

ગમાગમવિવર્જિતૈરસુભિરન્તરઙ્ગેઽનિશં
    ગજાસ્યગુહનન્દિભિઃ સુરવરૈર્મુદા ચિન્તિતે ।
ગજાજિનધરાનુજે ગલિતતૃષ્ણલોકેક્ષિતે
    ગતિં મમ શુભાં મતિં સપદિ દેહિ વાગીશ્વરિ ॥ ૪૫॥

જલોદ્ભવજભામિનિ પ્રણતસૌખ્યભૂમપ્રદે
    જડત્વવિનિવારણવ્રતનિષક્તચેતોઽમ્બુજે ।
જગત્ત્રયનિવાસિભિઃ સતતસેવ્યપાદામ્બુજે
    જગજ્જનનિ શારદે જનય સૌખ્યમત્યદ્ભુતમ્ ॥ ૪૬॥

મદેભગમનેઽવને નતતતેરનેકૈઃ સુખૈ-
    રનારતમજામિતં પ્રવણહૃત્સરોજેઽમ્બિકે ।
કુતો મયિ કૃપા ન તે પ્રસરતિ પ્રસન્ને વદ
    પ્રપઞ્ચજનનપ્રભુપ્રણયિનિ પ્રપદ્યેઽદ્ય કમ્ ॥ ૪૭॥

કદા વા શ્રુઙ્ગાદ્રૌ વિમલતરતુઙ્ગાપરિસરે
    વસન્માતર્વાચાં શિરસિ નિદધાનોઽઞ્જલિપુટમ્ ।
ગિરાં દેવિ બ્રાહ્મિ પ્રણતવરદે ભારતિ જવા-
    ત્પ્રસીદેતિ ક્રોશન્નિમિષમિવ નેષ્યામિ દિવસાન્ ॥ ૪૮॥

જગન્નાથં ગઙ્ગા વિવિધવૃજિનૌઘૈઃ પરિવૃતં
    યથાઽરક્ષત્પૂર્વં સકલમપિ હત્વાઽઽશુ દુરિતમ્ ।
પુનશ્ચાન્તે દત્ત્વા કરસરસિજં પૂર્ણકૃપયા
    જનૈઃ સદ્ભિઃ પ્રાપ્યાં પરમપદવીં પ્રાપિતવતી ॥ ૪૯॥

તથા શાન્તં પાપં સકલમપિ કૃત્વા મમ જવા-
    દ્ધૃદમ્ભોજે લગ્નં કુરુ તવ પદામ્ભોરુહયુગમ્ ।
કરામ્ભોજે પશ્ચાત્પરમકૃપયા દેવિ વચસાં
    પ્રદત્ત્વાઽઽલમ્બં માં ગમય પદવીં નિર્મલતરામ્ ॥ ૫૦॥

દવીયાંસં ત્વેનં પરમકૃપયા દેશિકમુખા-
    ત્સમાનીયામ્બ ત્વં તવ પદપયોજાતનિકટમ્ ।
અવિત્વાઽઽપીયન્તં સમયમધુના દેવિ ભજસે
    યદૌદાસ્યં તર્હિ ત્રિજગતિ મમાન્યાં વદ ગતિમ્ ॥ ૫૧॥

કામં સન્તુ સુરા નિરન્તરનિજધ્યાનાર્ચનાકારિણો
    લોકાન્સ્વેપ્સિતસર્વસૌખ્યસહિતાન્કર્તું જગત્યાં કિલ ।

પૂજાધ્યાનજપાદિગન્ધરહિતાંસ્ત્રાતું પુનસ્ત્વાં વિના
નાન્યદ્દૈવતમસ્તિપદ્મજમનઃપદ્માર્ભકાર્કપ્રભે ॥ ૫૨॥

કારુણ્યં મયિ ધેહિ માતરનિશં પદ્મોદ્ભવપ્રેયસિ
પ્રારબ્ધં મમ દુષ્ટમાશુ શમય પ્રજ્ઞાં શુભાં યચ્છ મે ।
કર્તું  કાવ્યચયં રસૌઘભરિતં શક્તિં દૃઢાં ભક્તિમ-
પ્યંહઃસઞ્ચયવારિણીં તવ પદામ્ભોજે કૃપામ્ભોનિધે ॥ ૫૩॥

કુર્યામદ્ય કિમમ્બ ભક્તિરહિતઃ પૂજાં જપં તર્પણં
કિં વૈરાગ્યવિવેકગન્ધરહિતઃ કુર્યાં વિચારં શ્રુતેઃ ।
કિં યોગં પ્રકરોમિ ચઞ્ચલમનાઃ શ‍ૃઙ્ગાદ્રિવાસપ્રિયે
ત્વત્પાદપ્રણતિં વિહાય ન ગતિર્મેઽન્યા ગિરાં દેવતે ॥ ૫૪॥

જહ્યાન્નૈવ કદાપિ તાવકપદં  માતર્મનો મામકં
માન્દ્યધ્વાન્તનિવારણોદ્યતદિનેશાખર્વગર્વાવલિ ।
ગૌરીનાથરમાધવાબ્જભવનૈઃ સમ્ભાવ્યમાનં મુદા
વાક્યાતુર્યવિધાનલબ્ધસુયશઃસમ્પૂરિતાશામુખમ્ ॥ ૫૫॥

તુઙ્ગાતીરવિહારસક્તહૃદયે શ‍ૃઙ્ગારજન્માવને
ગઙ્ગાધારિમુખામરેન્દ્રવિનુતેઽનઙ્ગાહિતાપદ્ધરે ।
સઙ્ગાતીતમનોવિહારરસિકે ગઙ્ગાતરઙ્ગાયિતા
ભૃઙ્ગાહઙ્કૃતિભેદદક્ષચિકુરે તુઙ્ગાગિરો દેહિ મે ॥ ૫૬॥

ત્વત્પાદામ્બુજપૂજનાપ્તહૃદયામ્ભોજાતશુદ્ધિર્જનઃ
સ્વર્ગં રૌરવમેવ વેત્તિ કમલાનાથાસ્પદં દુઃખદમ્ ।
કારાગારમવૈતિ ચન્દ્રનગરં વાગ્દેવિ કિં વર્ણનૈ-
ર્દૃશ્યં સર્વમુદીક્ષતે સ હિ પુના રજ્જૂરગાદ્યૈઃ સમમ્ ॥ ૫૭॥

ત્વત્પાદામ્બુરુહં વિહાય શરણં નાસ્ત્યેવ મેઽન્યદ્ધ્રુવં
વાચાં દેવિ કૃપાપયોજલનિધે કુત્રાપિ વા સ્થાપય ।
અપ્યૂર્ધ્વં ધ્રુવમણ્ડલાદથ ફણીન્દ્રાદપ્યધસ્તત્ર મે
ત્વન્યસ્તૈહિકપારલૌકિકભરસ્ત્વાસે ન કાપિ વ્યથા ॥ ૫૮॥

ત્વત્પાદામ્બુરુહં હૃદાખ્યસરસિસ્યાદ્રૂઢમૂલં યદા
વક્ત્રાબ્જે ત્વમિવામ્બ પદ્મનિલયા તિષ્ઠેદ્ગૃહે નિશ્ચલા ।
કીર્તિર્યાસ્યતિ દિક્તટાનપિ નૃપૈઃ સમ્પૂજ્યતા સ્યાત્તદા
વાદે સર્વનયેષ્વપિ પ્રતિભટાન્દૂરીકરોત્યેવ હિ ॥ ૫૯॥

માતસ્ત્વત્પદવૈભવં નિગદિતું પ્રારભ્ય નાગેશ્વરા-
    સ્વપ્પાચાર્યકવીન્દુશેખરદિનેશાદ્યાઃ પ્રભગ્ના મુહુઃ ।
ક્વાહં તત્કથને જડેષ્વચરમઃ કારુણ્યપાથોનિધે
    વાચાં દેવિ સુતસ્ય સાહસમિદં ક્ષન્તવ્યમેવામ્બયા ॥ ૬૦॥

માતઃ શૃઙ્ગપુરીનિવાસરસિકે માતઙ્ગકુમ્ભસ્તનિ
    પ્રાણાયામમુખૈર્વિનાપિ મનસઃ સ્થૈર્યં દ્રુતં દેહિ મે ।
યેનાહં સુખમન્યદુર્લભમહોરાત્રં ભજામ્યન્વહં
    પ્રાપ્સ્યામ્યાત્મપરૈકબોધમચલં નિઃસંશયં શારદે ॥ ૬૧॥

વેદાભ્યાસજડોઽપિ યત્કરસરોજાતગ્રહાત્પદ્મભૂ-
    શ્ચિત્રં વિશ્વમિદં તનોતિ વિવિધં વીતક્રિયં સક્રિયમ્ ।
તાં તુઙ્ગાતટવાસસક્તહૃદયાં શ્રીચક્રરાજાલયાં
    શ્રીમચ્છઙ્કરદેશિકેન્દ્રવિનુતાં શ્રીશારદામ્બાં ભજે ॥ ૬૨॥

વૈરાગ્યં દૃઢમમ્બ દેહિ વિષયેષ્વાદ્યન્તદુઃખપ્રદે-
    ષ્વામ્નાયાન્તવિચારણે સ્તિરતરાં ચાસ્થાં કૃપાવારિધે ।
પ્રત્યગ્બ્રહ્મણિ ચિત્તસંસ્થિતિવિધિં સમ્બોધયાશ્વેવ માં
    ત્વં બ્રૂષે સકલં મમેતિ ગુરવઃ પ્રાહુર્યતઃ શારદે ॥ ૬૩॥

કમલાસનવરકામિનિ કરધૃતચિન્મુદ્રિકે કૃપામ્ભોધે ।
કરકલિતામલકાભં તત્ત્વં માં બોધયતુ જગદમ્બ ॥ ૬૪॥

કરવિધૃતકીરડિમ્ભાં શરદભ્રસધર્મવસ્ત્રસંવીતામ્ ।
વરદાનનિરતપાણિં  સુરદાં પ્રણમામિ શારદાં સદયામ્ ॥ ૬૫॥

કામાક્ષીવિપુલાક્ષીમીનાક્ષીત્યાદિનામભિર્માતઃ ।
કાઞ્ચીકાશીમધુરાપુરેષુ ભાસિ ત્વમેવ વાગ્જનનિ ॥ ૬૬॥

ચન્દ્રાર્ધશેખરાપરરૂપશ્રીશઙ્કરાર્યકરપૂજ્યે ।
ચન્દ્રાર્ધકૃતવતંસે ચન્દનદિગ્ધે નમામિ વાણિ પદે ॥ ૬૭॥

જય જય ચિન્મુદ્રકરે જય જય શૃઙ્ગાદ્રિવિહરણવ્યગ્રે ।
જય જય પદ્મજજાયે જય જય જગદમ્બ શારદે સદયે ॥ ૬૮॥

દુર્વસનદત્તશાપપ્રતિપાલનલક્ષ્યતઃ સમસ્તાનામ્ ।
રક્ષાર્થમવનિમધ્યે કૃતચિરવાસાં નમામિ વાગ્દેવીમ્ ॥ ૬૯॥

નવનવકવનસમર્થં પટુતરવાગ્ધૂતવાસવાચાર્યમ્ ।
વનજાસનવરમાનિનિ વરદે કુરુ શીઘ્રમઙ્ઘ્રિનતમ્ ॥ ૭૦॥

ભગવત્પદમણ્ડનયોર્વાદમહે સકલલોકચિત્રકરે ।
અઙ્ગીકૃતમાધ્યસ્થ્યાં જગદમ્બાં નૌમિ શારદાં સદયામ્ ॥ ૭૧॥

સેવાપૂજાનમનવિધયઃ સન્તુ દૂરે નિતાન્તં
કાદાચિત્કા સ્મૃતિરપિ પદામ્ભોજયુગ્મસ્ય તેઽમ્બ ।
મૂકં રઙ્કં કલયતિ સુરાચાર્યમિન્દ્રં ચ વાચા
લક્ષ્મ્યા લોકો ન ચ કલયતે તાં કલેઃ કિં હિ દૌઃસ્થ્યમ્ ॥ ૭૨॥

આશાવસ્ત્રઃ સદાત્મન્યવિરતહૃદયસ્ત્યક્તસર્વાનુરાગઃ
કાયે ચક્ષુર્મુખેષ્વપ્યનુદિતમમતઃ ક્વાપિ કસ્મિંશ્ચ કાલે ।
શૈલાગ્રેઽરણ્યકોણે ક્વચિદપિ પુલિને ક્વાપિ રેવાતટે વા
ગઙ્ગાતીરેઽથ તુઙ્ગાતટભુવિ ચ કદા સ્વૈરચારી ભવેયમ્ ॥ ૭૩॥

કલ્પન્તાં કામ્યસિદ્ધ્યૈ કલિમલહતયે ચાક્ષયૈશ્વર્યસિદ્ધ્યૈ
કારુણ્યાપારપૂરાઃ કમલભવમનોમોદદાનવ્રતાઢ્યાઃ
કાત્યાયન્યબ્ધિકન્યામુખસુરરમણીકાઙ્ક્ષ્યમાણાઃ કવિત્વ-
પ્રાગ્ભારામ્ભોધિરાકાહિમકરકિરણાઃ શારદામ્બાકટાક્ષાઃ ॥ ૭૪॥

કલ્પાદૌ તન્મહિમ્ના કતિપયદિવસેષ્વેવ લુપ્તેષુ માર્ગે-
ષ્વામ્નાયપ્રોદિતેષુ પ્રવરસુરગણૈઃ પ્રાર્થિતઃ પાર્વતીશઃ ।
આમ્નાયાધ્વપ્રવૃદ્ધ્યૈ યતિવરવપુષાગત્ય યાં શૃઙ્ગશૈલે
સંસ્થાપ્યાર્ચાં પ્રચક્રે નિવસતુ વદને શારદા સાદરં સા ॥ ૭૫॥

તિષ્ઠામ્યત્રૈવ માતસ્તવ પદયુગલં વીક્ષમાણઃ પ્રમોદા-
ન્નાહં ત્યક્ત્વા તવાઙ્ઘ્રિં સકલસુખકરં ક્વાપિ ગચ્છામિ નૂનમ્ ।
છાયાં મત્કાં વિધત્સ્વ પ્રવચનનમનધ્યાનપૂજાસુ શક્તાં
શુદ્ધામેકાં ત્રિલોકીજનનપટુવિધિપ્રાણકાન્તે નમસ્તે ॥ ૭૬॥

ત્વદ્બીજે વર્તમાને વદનસરસિજે દુર્લભં કિં નરાણાં
ધર્મો વાઽર્થશ્ચ કામોઽપ્યથ ચ સકલસન્ત્યાગસાધ્યશ્ચ મોક્ષઃ ।
કામ્યં વા સાર્વભૌમ્યં કમલજદયિતેઽહેતુકારુણ્યપૂર્ણે
શૃઙ્ગાદ્યાવાસલોલે ભવતિ સુરવરારાધ્યપાદારવિન્દે ॥ ૭૭॥

દૃષ્ટ્વા ત્વત્પાદપઙ્કેરુહનમનવિધાવુદ્યતાન્ભક્તલોકા-

ન્દૂરં ગચ્છન્તિ રોગા હરિમિવ હરિણા વીક્ષ્ય યદ્વત્સુદૂરમ્ ।
કાલઃ કુત્રાપિ લીનો ભવતિ દિનકરે પ્રોદ્યમાને તમોવ-
ત્સૌખ્યં ચાયુર્યથાબ્જં વિકસતિ વચસાં દેવિ શ‍ૃઙ્ગાદ્રિવાસે ॥ ૭૮॥

નાહં ત્વત્પાદપૂજામિહ ગુરુચરણારાધનં ચાપ્યકાર્ષં
નાશ્રૌષં તત્ત્વશાસ્ત્રં ન ચ ખલુ મનસઃ સ્થૈર્યલેશોઽપિ કશ્ચિત્ ।
નો વૈરાગ્યં વિવેકો ન ચ મમ સુદૃઢા મોક્ષકાઙ્ક્ષાઽપિ નૂનં
માતઃ કાવા ગતિર્મે સરસિજભવનપ્રાણકાન્તે ન જાને ॥ ૭૯॥

નૌમિ ત્વાં શૈવવર્યાઃ શિવ ઇતિ ગણનાથાર્ચકા વિઘ્નહર્તે-
ત્યાર્યેત્યમ્બાઙ્ઘ્રિસક્તા હરિભજનરતા વિષ્ણુરિત્યામનન્તિ ।
યાં તાં સર્વસ્વરૂપાં સકલમુનિમનઃપદ્મસઞ્ચારશીલાં
શ‍ૃઙ્ગાદ્યાવાસલોલાં કમલજમહિષીં શારદાં પારદાભામ્ ॥ ૮૦॥

યઃ કશ્ચિદ્બુદ્ધિહીનોઽપ્યવિદિતનમનધ્યાનપૂજાવિધાનઃ
કુર્યાદ્યદ્યમ્બ સેવાં તવ પદસરસીજાતસેવારતસ્ય ।
ચિત્રં તસ્યાસ્યમધ્યાત્પ્રસરતિ કવિતા વાહિનીવામરાણાં
સાલઙ્કારા સુવર્ણા સરસપદયુતા યત્નલેશં વિનૈવ ॥ ૮૧॥

યાચન્તે નમ્રલોકા વિવિધગુરુરુજાક્રાન્તદેહાઃ પિશાચૈ-
રાવિષ્ટાઙ્ગાશ્ચ તત્તજ્જનિતબહુતરક્લેશનાશાય શીઘ્રમ્ ।
કિં કુર્યાં મન્ત્રયન્ત્રપ્રમુખવિધિપરિજ્ઞાનશૂન્યશ્ચિકિત્સાં
કર્તું ન ત્વત્પદાબ્જસ્મરણલવમૃતે વાણિ જાનેઽત્ર કિઞ્ચિત્ ॥ ૮૨॥

રાગદ્વેષાદિદોષૈઃ સતતવિરહિતૈઃ શાન્તિદાન્ત્યાદિયુક્તૈ-
રાચાર્યાઙ્ઘ્ર્યબ્જસેવાકરણપટુતરૈર્લભ્યપાદારવિન્દા ।
મુદ્રાસ્રક્કુમ્ભવિદ્યાઃ કરસલિલરુહૈઃ સન્દધાના પુરસ્તા-
દાસ્તાં વાગ્દેવતા નઃ કલિકૃતવિવિધાપત્તિવિધ્વંસનાય ॥ ૮૩॥

વારય પાપકદમ્બં તારય સંસારસાગરં તરસા ।
શોધય ચિત્તસરોજં બોધય પરતત્ત્વમાશુ મામમ્બ ॥ ૮૪॥

સચ્ચિદ્રૂપાત્મનિષ્ઠઃ પ્રગલિતસકલાક્ષાદિવૃત્તિઃ શયાનો
ભુઞ્જાનઃ સત્યસૌખ્યં તદિતરસુખતઃ પ્રાપ્તનીરાગભાવઃ ।
પાષાણે વાથ તલ્પે વનભુવિ સદને પાર્થિવસ્યાઽશ્મહેમ્નો-
ર્નાર્યાં મૃત્યૌ ચ તુલ્યઃ સતતસુખિમનાઃ સ્યાં કદા શારદામ્બ ॥ ૮૫॥

કિં પાઠયેયં લઘુચન્દ્રિકાં વા કિં વા ત્યજેયં સકલપ્રપઞ્ચમ્ ।
સ્વપ્નેઽદ્ય મે બ્રૂહિ કિમત્ર કાર્યં ડોલાયિતં મામકમમ્બ ચેતઃ ॥ ૮૬॥

ત્યાગે વાઽધ્યાપને વા મમ ખલુ ન ગિરાં દેવિ કાપ્યસ્તિ શક્તિ-
સ્ત્વં વૈ સર્વત્ર હેતુર્યદસિ નિરવધિર્વારિરાશિઃ કૃપાયાઃ ।
તસ્માત્સ્વપ્નેઽદ્ય કાર્યં મમ ખલુ નિખિલં બોધયૈવં કુરુષ્વે-
ત્યજ્ઞાનાં બોધનાર્થં ત્વમિહ બહુવિધા અમ્બ મૂર્તીર્બિભર્ષિ ॥ ૮૭॥

વિતર વિધિપ્રેયસિ મે વિમલધિયં વાઞ્છિતં ચ તરસૈવ ।
વિષ્ણુમુખામરવન્દ્યે વિધુબિમ્બસમાનવદનકઞ્જાતે ॥ ૮૮॥

શારદનીરદસન્નિભવસને વનજાસનાન્તરઙ્ગચરે ।
વરટાવલ્લભયાને વરદે વાગ્દેવિ શારદે પાહિ ॥ ૮૯॥

સપ્તદશઘસ્રમવિરતમીશેન સમસ્તવિદ્યાનામ્ ।
વિરચિતવાદાં કુતુકાત્સામોદં નૌમિ વાગ્જનનીમ્ ॥ ૯૦॥

સુરવરનિષેવ્યપાદે સુખલવાધૂતકેકિકુલનિનદે
સુરવનવિહારબલદે સુરવરદે પાહિ શારદે સુરદે ॥ ૯૧॥

કુન્દરદનેઽમ્બ વાણિ મુકુન્દરવીન્દ્રાદિદેવવર્યેડ્યે ।
કુન્દરકૃપાવશાન્મુકુન્દવરાદ્યાંશ્ચ મે નિધીન્દેહિ ॥ ૯૨॥

સ્ફુરશરદિન્દુપ્રતિભટવદને વાગ્દેવિ મામકે મનસિ ।
વરદાનનિરતપાણે સરસિજનયને સરોજજાતસખિ ॥ ૯૩॥

અસ્થિરભક્તેર્મમ દેવિ ગિરાં શીઘ્રં દત્ત્વા કાઞ્ચિત્સિદ્ધિમ્ ।
કુરુ સુદૃઢાં મમ તવ પાદાબ્જે ભક્તિં શ‍ૃઙ્ગગિરીન્દ્રનિવાસે ॥ ૯૪॥

સહમાનસોદરિ સહ પ્રણતકૃતા માનહીનમન્તુતતીઃ ।
સહમાનસોદરીત્વં ત્યજ વા યુક્તં યદત્ર કુરુ વાણિ ॥ ૯૫॥

વલભિન્મુખનિર્જરવરસેવ્યે કલવચનન્યક્કૃતપિકરાવે ।
જલજપ્રતિભટપદયુગરમ્યે કલય પ્રવરં કૃતિનામેનમ્ ॥ ૯૬॥

કરવિલસદ્વરપુસ્તકમાલે શરદબ્જાહઙ્કૃતિહરચેલે ।
અરણીસુમનિભકુઙ્કુમફાલે શરણં મમ ભવ ધૃતશુકબાલે ॥ ૯૭॥ var અરણીસુતનિભ
કલયાસક્તિં કમલજદયિતે તુલનાશૂન્યામીમ્મનુવર્યે ।
વલયાઞ્ચિતકરસરસીજાતે લલનાભિઃ સુરવિતતેઃ પૂજ્યે ॥ ૯૮॥

શૃઙ્ગક્ષ્માભૃત્કૂટવિહારે તુઙ્ગાતટભૂકૃતસઞ્ચારે ।
વાચાં દેવિ પ્રાર્થિતમર્થં શીઘ્રં દેહિ પ્રણતાયાસ્મૈ ॥ ૯૯॥

નાહં સોઢું કાલવિલમ્બં શક્નોમ્યમ્બ પ્રણતપ્રવણે ।
ઈપ્સિતમર્થં દેહિ તદાશુ દ્રુહિણસ્વાન્તામ્બુજબાલઘૃણે ॥ ૧૦૦॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીશારદાશતશ્લોકીસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Shri Sharada Shatashlokistavah*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*